National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(62): 224-227
© 2025 NJHSR
www.sanskritarticle.com

**डा. कृष्ण ए नागसम्पिगे**
योजनासहायकः,
ओरियन्टल् रीसर्च् इन्स्टिट्यूट्,
मैसूरु

**Correspondence:**
**डा. कृष्ण ए नागसम्पिगे**
योजनासहायकः,
ओरियन्टल् रीसर्च् इन्स्टिट्यूट्,
मैसूरु

# नूतन शिक्षाप्रविधीनां न्यायवैशेषिकशास्त्रयोः शिक्षणे अनुपालनम्

**डा. कृष्ण ए नागसम्पिगे**

भारतीयदर्शनानि स्थूलरूपेण द्विधा विभज्यन्ते। आस्तिकदर्शनानि-नास्तिकदर्शनानि इति। यानि दर्शनानि वेदानां प्रामाण्यं अङ्गीकृत्य जगत्तत्वं आत्मतत्वं च आवेदयन्ति तानि आस्तिकदर्शनानि। यानि च वेदानां प्रमाण्यं नाङ्गीकुर्वन्ति अपि तु केवलेन प्रात्यक्षिकज्ञानेन अनुमानेन वा जगत्तत्वम्, बोधयन्ति तनि नास्तिकदर्शनानि। तेषु न्यायवैशेषिक-साङ्ख्ययोग-मीमांसावेदान्ताख्यानि आस्तिकदर्शनानि। चार्वाकजैन-बौद्धदर्शनानि च नास्तिकदर्शनानि इति प्रथितानि। तेषु आस्तिकदर्शनेषु अन्यतमं दर्शनं न्यायदर्शनम् ॥
न्यायदर्शनम्- न्यायदर्शनस्य अर्थविवरणप्रसङ्गे भगवान् वात्सायन आह- "प्रमाणैः अर्थपरीक्षणं न्यायः"[1]। अस्य शास्त्रस्य नामान्तरं विद्यते 'आन्वीक्षिकी' इति । तस्य अर्थः भाष्ये एवं प्रदर्शितः प्रत्यक्षागमाभ्यां ईक्षितस्यान्वीक्षणं अन्वीक्षा तया प्रवर्तत इति आन्वीक्षकी न्यायविद्या इति। अस्य ईदृशार्थप्रतिपादकत्वं तत्वचिन्तमणिकारेणाऽपि अभ्यनुज्ञातं उक्तं च प्रत्यक्षचिन्तामणौ 'अथ जगदेव दुःखपङ्कनिमग्गम् उद्दिधीर्षुः अष्टादशविद्यास्थानेषु अभ्यर्हिततमाम् आन्वीक्षकीं परमकारुणीको मुनिः प्रणिनाय' इति ॥
अनेन न केवलं न्यायदर्शनप्रतिपाद्यः गुणः अभिहितः किन्तु अस्य सर्वोत्कर्षः अपि प्रतिपादितः। सर्वोत्कृष्टत्वमस्य च परमपुरुषार्थसाधनत्वात्। प्रमाणं च अत्र गौतमसूत्रम्- "प्रमणप्रमेयसंशयप्रयोजन-दृष्टान्तसिद्दान्तावयववादजल्पवितण्डहेत्वाभासछलजातिनिग्रहस्थानानां तत्वज्ञानात् निश्रेयसाधिगमः"[2] इति ॥
आन्वीक्षिक्याः सर्वशास्त्रोपकारकत्वप्रतिपादनम् -"मानाधीना मेयसिद्धिः" इत्यभियुम्तानुसारेण प्रमेयव्यवस्थापने प्रमाणानां परं वैशिष्यट्यमस्ति। तादृश प्रमाणनिरूपणे अनितरसाधारण चातुर्यप्रदर्शकं बुद्धिविकासकं च भवति न्यायशास्त्रं सर्वशास्त्रणां प्रदीपः एव वर्तते ।तदुक्तं वात्सायनेन

**'प्रदीपः सर्वविद्यानां उपायः सर्वकर्मणाम्।**

**आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीतिर्ता ॥'**[3] इति

वेदप्रतिपादिताः धर्माधर्मरूपादयः ये अर्थाः तेषां स्वरूपं वेदाविरोधि तर्कसाहाय्येन ज्ञातव्यमिति मनुरपि वेदाविरोधितर्कस्य श्रोतार्थनिर्णयसहकारित्वं प्रतिपादितवान् ।

**आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।**
**यस्तर्केणानुसंन्धत्ते स धर्मं वेद नेतरः ॥**

न्यायदर्शनसामान्य परिचयः (सारः) :- भागवता गौतमेन प्रणीते न्यायशास्त्रे एवं तत्वसङ्क्षेपः विज्ञेयः प्रत्यक्षादिप्रमाणचतुष्येन पदार्थज्ञाने हानोपादानादि साफल्यात् प्रमाणमर्थवद्भवति इति सामान्यतः प्रमाणस्वरूप विमर्शः कृतः । तदुक्तं भाष्ये- "प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यात् अर्थवत् प्रमाणम्" इति। प्रमण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्दान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्ड-हेत्वाभास-छल-जाति-निग्रहस्थानारूप षोडशपदार्थज्ञात् मुक्तिप्राप्तिः इति प्रतिपादितम् । तदुक्तं सूत्रे -

"प्रमणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्दान्तावयववादजल्पवितण्डहेत्वाभासछलजातिनिग्रहस्थानानांतत्वज्ञानात् निश्रेयसाधिगमः" इति ।

संसारबन्धनस्य मूलं भवति मिथ्याज्ञानम्। दुःखजन्मप्रवृत्ति-दोषमिथ्याज्ञानानां उत्तरोत्तरापाये पूर्वपूर्वस्य विनाशेन अपवर्गः भवति। तदुक्तं सूत्रे-"दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानां उत्तरोत्तरा-पाये तदनन्तारापायादपवर्गः"" इति। प्रत्याक्षानुमानोपमानशब्दाः प्रमाणानि। अस्मिन् दर्शने वेदस्य अपौरूषेयत्वं नाभ्युपगम्यते। अनुमानेन ईश्वरसिद्धिं ब्रुवाणाः नैय्यायिकाः ईश्वरोक्तत्वात् वेदप्रामाण्यं अभ्युपगच्छन्ति। अर्थापत्तित्यैतिह्यादीनां अनतिरिक्त-त्वात् अनुमाने एव अन्तर्भावयन्ति। प्रमाणैः एभिः प्रमातव्य अर्थः एवं निरूपितः। आत्म-शरीर-इन्दिय-अर्थ-बुद्धि-मनः-प्रवृत्ति-दोष-प्रेत्भाव-फल-दुःख-अपवर्गाः अवश्यं ज्ञेयाः। अचेतनेशु अपरिदृष्यमानानां ज्ञान-सुखदुःख-इच्छादीनां यत्र उपलम्भः तेषां चैतन्यं न्यायविद्भिःअभ्युपेयते। दर्शनेऽस्मिन् चेतनाः अनन्ताः विभुपरिमाणोपेताः। तत्वज्ञानेन च मिथ्याज्ञानापाये एकविंशतिदुःखनिवृत्तिरूपः मोक्षः सम्पद्यते ॥

इतरदर्शनेषु न्यायदर्शनस्य प्रभाव: : - "काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्" इति वचने काणदपदं तर्कशास्त्रपरम्। न्यायस्याप्युपलक्षकम्। व्यवहारे न्यायनयः इति वदन्तो द्वैतवेदान्तिनः न्यायशास्त्रपद्धतिं उररीकृत्य स्वदर्शनम् अभिवर्धयामासुः। यद्यपि प्रमाणप्रमेयादिपदार्थतत्वस्वरूपे भेदः अस्येव। तथाऽपि चिन्तनक्रमस्तु न्यायशास्त्रमाधारीकृत्य प्रवर्तते। सकलास्तिकदर्शनाधारभूतानां वेदानां प्रामाण्यसमर्थनं न्यायशास्त्रेण भवति । न्यायशास्त्रप्रतिपादित न्यायसहकारेण वेदार्थज्ञानमपि संम्भवतीति हेतोः न्यायशास्त्रमपि वेदोपकारकं भवत्येव ॥

न्यायदर्शनेन सामाजिक प्रयोजनानि :- न्यायदर्शनेन किं प्रयोजनम् इत्यत्र प्रमाणप्रमेयादिपदार्थतत्वज्ञानं ततः निःश्रेयसम् इति सिद्धम्। न्यायशास्त्रेण पदार्थनां साधर्म्य - वैधर्म्य पुरस्सरेण ज्ञानं भवति । तेन च हानोपादान- उपेक्षाबुद्धिरूपं दृष्टं प्रयोजनं समाजस्य अस्त्येव। न्यायशास्त्रस्य अध्ययनेन अध्येतॄणां बुद्धिः निशिता भवति। अतिदेशसामर्थ्यं प्रवर्धते । सूक्ष्मतरा आलोचनारीतिः उत्पद्यते। विचारकौशलं,वादकौशलं अन्यूनानतिरिक्ततया प्रमेय प्रतिपादनशैली च प्रवर्धते ।

**वैशेषिकदर्शनसारः-**

सूत्रकृता कणादेन द्रव्य-गुण-कर्म-सामान्य-विशेष-समवाय- इति षट् भावपदार्थाःअङ्गीकृताः। तथा च सूत्रम्"धर्मविशेषप्रसूतात् द्रव्यगुणकर्मसामान्यविशेषसमवायानांपदार्थानां साधर्म्य-वैधर्म्याभ्यां तत्वज्ञानात् निश्रेयसम्"" इति। एतेष्वेव नैय्यायिकोक्त षोडष-पदार्थानां अन्तर्भावः । अभावस्याऽपि सप्तमपदार्थत्वम् अत्रेष्टम्। एवं सप्तपदार्थाः वैशेषिकनये स्वीकृताः। प्रत्यक्षानुमाने द्वावेव प्रमाणे । शब्दस्य तु पृथक् प्रामाण्यं नेष्यते । अत्र वैशेषिकदर्शने अयं विशेष: अनुसन्धेयः । यद्वै प्रत्यक्षेण उपलभ्यते लिङ्गञ्च अनुमिनोति तमेव परान् बोधयितुं च करुणया शब्द प्रयुङ्क्ते शब्दन योऽर्थः प्रमीयते प्रमीयते सोऽयं प्रत्यक्षानुमानभ्यां अवगत इति न शब्दः पृथक् प्रमाणम्। योऽपि अलौकिकः अर्थः तत्रापि आर्षं प्रत्यक्षमूलं विज्ञानं हेतुः इत्युक्तं कणादेन। "एतेन शाब्द व्याख्यातम्" ।

अस्य दर्शनस्य वैशेषिक इति कथने हेतुः :- विशेषः इतरदार्शनिकैः अनङ्गीकृतः पदार्थः परमाणूनां भेदसाधकतया अत्रैव स्वीकृतः । अतः वैशेषिकम् इत्युच्यन्ते अमी दार्शनिकाः ॥

विशेष-विशेषगुणःअत्र दर्शने विशेषगुणाः इच्छाद्वेषादयः आत्मनि स्वीकृताः-

**"रूपंगन्धोरसःस्पर्शःस्नेहोसासिद्धिको द्रवः ।**
**बुध्यादिभावनान्ताश्च शब्दोवैशेषिको गुणाः" ॥**

वेदान्तसाङ्ख्यादिदर्शनेषु तु मनसः धर्माः इच्छादयः । आत्मनि नैव अङ्गीकृताः । अशेषविशेषगुणनिवृत्तिः मोक्षः इति अस्मिन् नये अङ्गीक्रीयते अतः वैशेषिकम् दर्शनम् ।

**द्वित्वे च पाकजोत्पतौ विभागे च विभागजे।**
**यस्य न स्खलिता बुद्धिः तं वै वैशेषिकं विदुः॥**

नयेऽस्मिन् द्वित्वोत्पत्तेः, पाकात् रूपोत्पत्तेः, विभागात् विभागोत्पत्तेः च प्रक्रियाः विशेषरूपेण प्रतिपादिताः । विशेषः भेदः । इह दर्शने आत्मभेद: अङ्गीकृतः, जीवात्मपरमात्मनो भेदः जीवानां परस्परभेदःअभ्युपगतः इति॥

इतरदर्शनेषु वैशेषिकदर्शनस्य प्रभावः :- 'काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्' इत्याभाणकेनैव इतरशास्त्रेषु वैशेषिक-दर्शनस्य प्रभावः दृश्यते। वैशेषिकशास्त्रमनधीयानः कोऽपि इतरशास्त्राणि अनायासेन अध्येतुं प्रभवति दृष्टं चैतत् बहुत्र अस्य दर्शनस्य प्रभावः। यथा भ्रमविषये भाट्टैः वैशेषिकरीतिरेवाऽद्वतेति शास्त्रदीपिकायाः सिद्धान्तचन्द्रिकाव्याख्यातः अवगम्यते। नव्यमीमासकाः खण्डदेवादयः अपि स्वग्रन्येषु नव्यन्यायवैशेषिकशैलीं आदृतवन्ताः इति मीमांसानये दृश्यते न्यायवैशेषिकयोः प्रभावः। एवं वैशेषिकैः नैय्यायिकैः कःआदृतः परमाणुकारणतावाद : बौद्धैः स्वीकृतः इति तदीयसिद्धान्तावलोकनेन विज्ञायते। दिङ्गागादि बौद्धाःस्वसिद्धान्तमण्डने परसिद्धान्तखण्डनेच नैय्यायिकैः आदृतां परिष्कारशैलीमेवानुससुः ॥

न्यायवैशेषिकमतयोः साम्यवैषम्ये- प्रथमतः साम्यनिरूपणम्-

१.उभयोर्दर्शनयोरसत्कार्यवादोऽभ्युपगतः। साङ्ख्यमते कार्यकारण-योस्तादात्म्यमुररीकृतम्। साङ्ख्यास्तु तन्तव एव पटात्मना परिणमन्त इति वदन्ति न्यायवैशेषिकदर्शने तु तन्तुषु तद्भिन्नः पटो जायत इत्यभ्युपगम्यते ।

२.सकलेषु कार्येषु समवायिकारणासमवायिकारणनिमित्तकारण-प्रतिपादके उभे अपि मते ।

३.आत्माङ्गीकारे साम्यम्। 'इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्" इति न्यायसूत्रे इच्छाद्वेषादिभिरात्माऽनुमेयः इति प्रतिपादितम् । समानश्चायमंशो वैशेषिकदर्शनेऽपि ।

४.मनसोऽणुत्वेन युगपद्ज्ञानानुत्पत्तिर्भवति। तथा च न्यायसूत्रम्-'युगपद्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् इति। वैशेषिका अपि

एवमभिप्रयन्ति । तथा च वैशेषिकसूत्रम्- “आत्मेन्द्रियार्थसन्निकर्षे ज्ञानस्य भावोऽभावश्च मनसो लिङ्गम्” इति ।

वैषम्यनिरूपणम्-

एतेषु विषयेषु एतयोर्दर्शनयोर्वैषम्यमस्ति ।

१. वैशेषिकाः हेत्वाभासत्रयं वर्णयन्ति- असिद्धिर्विरोधः सन्दिग्धत्वम् (अनैकान्तिकत्वम् ) इति । नैयायिकास्तु पञ्च ।


२. प्रमाणविभागविषये मतभेदः । नैयायिकाः चतुः प्रमाणवादिनः । वैशेषिकास्तु शब्दस्योपमानस्य च प्रामाण्यमङ्गीकृत्यापि ते द्वे अपि अनुमानेऽन्तर्भावयन्ति ।

३. न्यायमते षोडशपदार्थज्ञानान्मुक्तिः । वैशेषिकमते तु द्रव्यगुणादि - षट्पदार्थज्ञानान्मुक्तिः ।

४. वैशेषिकाः ‘पीलुषु’ परमाणुषु पाकं वदन्ति । तेषां मते विलक्षण-तेजस्संयोगरूपपाकबशाद् घटस्याऽपरमाण्वन्तभङ्गे जाते परमाणुषु एव पाकवशाद्रूपान्तरोत्पत्तिपूर्वकं द्व्यणुकाद्युत्पत्तिक्रमेण घटान्त-रोत्पत्तिर्भवति। नैयायिकास्तु साक्षाद् घटे एव पाकं प्रतिपादयन्ति । अत एते पिठरपाकवादिनः।

एतादृश न्यायवैशेषिकदर्शनयोः पाठने आधुनिकशिक्षाप्रविधी-नामनुप्रवेशेन कथं छात्राणां नूतनतया शास्त्रं अध्येष्यमाणानां च सहकारी भवति इत्येतत् किञ्चिन्निवेद्यते अस्मिन् लघुप्रबन्धे |


Conceptual Graphs पद्धतिः :- इयं च प्रणाली पाश्चात्य ग्रन्थेषु भूयशः दृष्यते। न्यायशास्त्र अध्यापने अयं मार्गः छात्राणां अत्यन्तमुपकारभूतः। concept नाम प्रतिपाद्यमानः विषयः तस्य Graphs चित्रमूलकेन बोधनम्। यदा अध्यापकाः एतादृश प्रणालीमनुसृत्य बोधयन्ति तदा छात्राणां विषयावगमने सौकर्यं भवेत्। इयं च प्रणाली चक्षुषः पुरतः विद्यमान वस्तुरिव प्रतिपद्यमानं विषयान् पुरतःआनयति । यथा घटाभाववत् भूतलम् इति बोधनीये घटनिष्ठप्रतियोगिता- निरूपित अनुयोगिताश्रयः अभावः/अभावनिष्ठ आधेयतानिरूपिताधिकरणतावद् भूतलं इति कथयामः । पद्धतिमिमां अनुसृत्य :-




इत्येवं कथनेन कुत्र के पदार्थाः भासन्ते इति अवगन्तुं प्रभवन्ति॥


अपरमुदाहरणम्

एकत्वावच्छिन्नप्रकारतानिरूपितघटादिनिष्टविशेष्यतानिरूपकज्ञाननिष्ठकार्यतानिरूपितकारणताश्रयशब्दप्रयोगनिष्ठकार्यतानिरूपितकारणताश्रयः सङ्ख्या । तादृशकार्यतानिरूपितकेणताश्रयत्वं सङ्ख्यायाः लक्षणम् ॥




व्याप्तिपदेन के पदार्थाः बोध्यन्ते ?

के ते पदार्थाः ये व्याप्तिपदेन बुद्ध्यन्ते? साध्यम्, अभावः, अधिकरणं, वृत्तित्वम्, अभावः इति पञ्च पदार्थाः । प्रथमाभावस्य साध्यं प्रतियोगि, द्वितीयाभावस्य वृत्तित्वम् आधेयत्वं प्रतियोगि भवति । साध्यस्यः यः अभावः, तस्य यत् अधिकरणं तन्निरूपिता या वृत् तस्याः अभावः इति विशेष्यविशेषणभावापन्नाः पञ्च पदार्थाः व्याप्तिपदेन उच्यन्ते ।




एवं पदानां स्वभावान् आदाय अस्माभिः व्याप्तिः निरूपिता । एतादृशः व्याप्त्याख्यः सम्बन्धः यस्मिन् ज्ञायते, तस्य हेतुभूतस्य धूमस्य ज्ञानेन वह्नेः ज्ञानं भवति । तच्च व्याप्तिरूपसम्बन्धस्य ज्ञानं धूमे न केवलं व्याप्तिम् अवगाहते, किन्तु धूमः वह्निव्याप्य इति पर्वतः धूमवान् इति ज्ञानाभ्यां जायमानत्वात् पर्वते धूमं, धूमे व्याप्तिं चावगाहते। तच्च धूमज्ञानं परामर्शः इत्युच्यते। यदग्रिमक्षणे वह्निप्रमा अनुमितिरूपा उत्पद्यते। एवं Conceptual Graphs पद्धतिः अवबोधनाय अत्यन्तम् उपयुक्तः ॥

Story telling Method :- कथामूलकं प्रतिपाद्यमान विषयप्रतिपादनम्। अयं च क्रमः बालानां, नूतनतया शास्त्रमध्येष्यमानानामत्यन्तमुपकारभूतः। अस्मद् गुरुचरणाः देवदत्त

पाटिल महाभागाः कथान्यायेन न्यायप्रमेयान् अवबोधयामासुः। द्रव्यं, गुणइत्येते पदार्थाः : पुरतः दृश्यमानाः सुखेन अवगन्तु शक्नुमः। परन्तु सामान्य, विशेषः, समवाय, कार्यकारणभावः, आधाराधेयभावः, प्रतिबध्यपतिबन्धकभावः, एते प्रमेयाः केवलं पठनेन अनुभवगोचराः न भवेयुः । कथमूलकेन नूतनप्रणाल्या च अध्यापनेन एते प्रमेयाः सुष्ठु गृहीताः भवेयुः ॥

Known to Unknown Method: अयं क्रमः अध्येष्यमाना-नामतिदेशसामर्थ्यं विकासयति । केचन अंशाः कुत्रचित् विषये ज्ञाताः तानेव अंशानादाय अन्यत्राऽपि उपयुज्य तदर्थज्ञापनम्। यथा गुणक्रिययोः असमवायिकारणत्वं इति प्रथितम् "गुणकर्ममात्र-वृत्तिज्ञेयमथाप्यसमवायिहेतुत्वम्"इति एकत्र गुणक्रिययोः असमवायि-कारणत्वे विज्ञाते कार्यत्वावच्छिन्नं प्रति तयोः असमवायि-कारणत्वोपपादनम् अनया प्रणाल्या सुकरं भवति ।

Mind Mapping Method: अयं क्रमः युगपदेव अनेकान् पदार्थान् बुद्धौ व्यवस्थापयितुं अत्यन्तं उपयुक्तः यथा यश्च छात्रःतर्कसंग्रहस्य अध्ययनं करोति तस्य Mind Mapping द्वारा सकलद्रव्याणां तेषां स्वरूपानां लक्षणानां च ज्ञानं युगपदेव भविष्यति ।

Simple to Complex Method: अयं क्रमः न्यायशास्त्रे बुहत्र उपयुक्तः बोधने सहकारी च भवति । सामान्यं ज्ञात्वा विशेषे जिज्ञासा इति। एकं वस्तु सामान्यतया ज्ञातः चेत् विशेषतया तस्मिन् जिज्ञासा भवति। यथा पृथिवी द्रव्यत्वेन सामान्यतः ज्ञाता पुनः गन्धवत्वादिविशेष लक्षणपुरःसरेण अवगन्तु शक्या। सामान्यज्ञानाभावे विशेषजिज्ञासा न उदेति। अतः बोधनोपयोगी अयं क्रमः॥

Analysis to Synthesis Method: इयं प्रणाली न्यायशास्त्रे अत्यन्तोपयुक्ता । एषु एका प्रणाली सर्वं संग्रह्य प्रतिपादयति ।अन्या विविच्य प्रतिपादयति । यथा प्रत्यक्षकारणीभूतः इन्द्रियार्थसन्निकर्षः । स च षड्विधः संयोगः,संयुक्तसमवायः इत्यादि । संयोगः भिन्नः संबन्धः समायः भिन्नः । तयोः प्रातिस्विकरूपेण बोधन अत्र भवति एतादृश नूतनप्रणलीनामुपयोगेन शास्त्रे छात्राणां रूचिः भवति । अत अस्य उपयोगः करणीयम् ॥

**उपयुक्तग्रन्थसूची :**

१. न्यायवार्तिक
२. न्यायभाष्यम्
३. न्यायकन्दलि ४. दिनकर
५. न्यायसिद्धान्तमुक्तावलि
६. वैशेषिकसूत्रम्
७. वैशेषिकसूत्र उपस्करव्याख्या
८. षड्दर्शनसमुच्चयः

**संदर्भ ग्रंथ**

[1] न्या.भा.1,1,1,पृ-4

[2] न्या.सू.पृ-२

[3] न्या.भा.1.1.1पृ-8